(1) हरतिमनः॥ श्यास्त्याहृत्र विभ्यइनच्।। हरिणौपांडुसारंगौहरिणीचारुयोषिति।सुवर्णप्रतिमायांचहरित्वृत्तभेदयोरितिहैमः।पां
डुत्वमस्यास्ति।नगपांसुपांडुभ्योरः।पांडुरोवर्णतद्वतोः।पांडुरंतुमरुबकेइतिहैमः।पंद्यतेज्ञायते।पडिगतौ।मृगय्वादित्वात्कुः।ए
षोदरादित्वाद्दीर्घः।पांडुरक्तपीतभागार्द्धःकेतकीधूलिसन्निभइतिशब्दार्णवः।पांडुःकुंतीपतौसितेइतिहैमः।त्रीणिपीतसेव

हरिणःपाडुरःपांडुरिषत्पांडुरक्तधूसरः॥२३॥ ॥

लितशुक्लस्य।धूनोतिचेतः।धूविधूनने।क्षुधूमथिभ्यःक्सरः।बाहुलकादषत्वं।यद्वा।धूसनं।धूसकांतौ।चुरादिःएरच्।
धूसंराति।रादाने।आतोनुपसर्गेकः।धूसरीकिन्नरीभेदेनाखरेत्रिषुपांडुरे।धूसरःस्फोसितःपीतलेशवानल्पकुलध्वनिरितिश
ब्दार्णवः॥ ॥एकं॥१३॥ ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

अ॰ टी॰ २ रोहति॥ रुह जन्मनि प्रादुर्भावे। रुहेरश्चलो वेति तन्। लोहितो मंगले नदे। वर्णभेदे लोहितं तु कुंकुमे रक्तचंदने। गोशीर्षे रुधिरे युद्धे इति हेमः।
रज्यति स्म। रंज रागे। क्तः। यद्वा। रज्यते स्मात् स च प्रीयते अनित्यण्यंतश्चुरादयः इति णिजभावे क्तः। अतो लोपः। चोः कुः। रक्तं नील्यादि

रोहितो लोहितो रक्तः शोणः कोकनदच्छविः॥४॥ श्लोकं पथरावा॥

रंजिते। कुंकुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे इति हेमः। त्रीणि। शोणयति। शोण्ट वर्णे। पचाद्यच्। शोणः कृशानौ रक्ते याना के १०४
लोहिताश्च नदे पुमान्। त्रिषु लोकनदच्छाये। कोकनदं रक्तोत्पलमिव छविर्यस्य॥ ॥६॥ ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

कर्षतीति मनः। कृष्णे वर्णे इति नक्। कृष्णः काके पि वर्णे ना विष्णौ व्यासे ऽर्जुने कलौ। कृष्णा तु नील्यां द्रौपद्यां पिप्पलीद्राक्षयोरपि। कृष्णं तु मरिचे लोहे
इति हेमः। नीलति। नील वर्णे। इगुपधेति कः। नीलो वर्णे मणौ शैले निधि वानरभेदयोः। नील्योषध्यां लांछने चेति हेमः। सितविरुद्धो ऽसितः।
श्यायते मनो ऽस्मात्। श्यैङ् गतौ। इषियुधीधीतिमक्। श्यामों ऽबुदे त्रितो। हरितप्रयागवटकोकिलवृद्धदारुके। श्यामं सैंधवे मरिचे श्या
मा सोमलतानिशयोः इति हेमः। कल्यते कालः। कल संख्याने। घञ्। कालः पाटे कृष्णवर्णे महाकाल कृतांतयोः। मरणानेहसोः काली

**कृष्णनीलासितश्यामकालश्यामलमेचकाः॥ ॥**

कालिका क्षीरकीटयोः। मातृभेदामयोर्नव्यमेघयोः। काला कृष्णत्रिवृन्नील्यां झुम्यां इति हेमः। श्यामः श्यामत्वमस्यास्तीति। सिध्मादित्वाल्ल
च्। श्यामलः पिप्पले श्यामे इति हेमः। मचति मिश्रीभवति वर्णांतरेण। मच मुचि कल्कने। कृञादिभ्यः संज्ञायां वुन्। पचिमच्योरित्वोपधा
या इतीत्वे लघूपधगुणः। मेचकः श्यामले कृष्णे तिमिरे बर्हिचंद्रके इति हेमः। सप्त कृष्णस्य। नाट्यार्णवे तु मेचकः कृष्णनीलः स्यादतसी
पुष्पसंनिभ इत्युक्तं॥ ॥ ॥

अ० टि० १ पीयतेपिबतिवर्णान्तरं॥औणादिकः क्तः। पीतंपानेहरिद्रायांस्त्रियांगौरेऽभिधेयवत्। यत्तुपीयतेवर्णानुपातेर्वाहुलकादंजिघृषिभ्यः
क्तः घुमास्थागेत्यादिनाईत्वमितिमुकुटेनोक्तं। तदसंबद्धमितिस्फुटमेव। हरिद्राभादीप्तिरस्य। त्रीणि। पत्रस्यपलाशस्यायं। त
स्येदमित्यण्। पत्रंपलाशंनारस्यः शटीहरितकिंशुकइतिरुद्रात्कस्वादिरपि। तत्रसंज्ञापूर्वकत्वाद्वृद्ध्यभावः। यद्वा। पलंभक्ष्या

(3) पीतोगौरोहरिद्राभः पालाशोहरितोहरित्॥१४॥

ति। अशुभोजने। कर्मण्यण्। ततः प्रज्ञाद्यण्। पलाशः किंशुकशाखा। हरिद्वर्णोराक्षसश्चपलाशंच्छदनेस्मृतमितिहैमः। त्रोषेइ १०५
त्यस्यविधितांगीकारादणित्याहुः। तन्न। तस्येदमितिसिद्धेशेषत्वाभावात्। हरति। हृश्याभ्यामितन्। हृसृरुहियुषिभ्यइतिः।
हरित्। हरितास्त्रीचदूर्वायांहरिद्वर्णयुतेऽन्यवत्। त्रीणिहरितवर्णस्य॥१४॥ ॥ ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

अव्यक्तः रागो यस्य॥ किंचिल्लोहितः। ऋ गतौ। अर्तेरुनन्। अरुणः कृष्णलोहित इत्यमरमाला। अरुणोऽव्यक्तरागेऽर्केसंध्या रागेर्कसारथौ। निःशब्दकपिलकुष्ठभेदेनागुणिनित्रिषु। अरुणातिविषाश्यामामंजिष्ठात्रिवृतासुच। द्वे। पाटयति। स्यंताङ्कशादि त्वात्कलच्। पाटलाकुसुमाभः पाटलः। पाटलंतुकुसुमश्वेतरक्तयोः। पाटलः स्याद्दाशुव्रीहौ पाटलापाटलिद्रुमे इति हैमः। द्वे॥१५॥

अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः॥१५॥ श्यावः स्यात्कपिशो धूम्र धूमलौ कृष्णलोहिते॥ ॥

श्यैङ् गतौ। श्यायते। बाहुलकात्स्यट्ट्श्यावः। कपिर्वर्णविशेषः। सोस्यास्ति। लोमादित्वात्शः। कपिर्मर्कटः तद्वर्णत्वादितिवा। कपिशः स्त्रिषु श्यामे स्त्री माधव्यां सिह्लके पुमान्। कृष्णपीतस्यद्वे। धूमं राति। कः। पृषोदरादिः। धूमं लाति। ला आदाने। कः। कृष्णमिश्रो लोहितः। त्रीणि॥ ५

अ० टी० १ गडति॥ गडसेचने। गडेः कडचेत्यारन्। यद्वा। कडनं कडः। खनेोघचेतिघः। कडमृच्छति। ऋगतौ। कर्मण्यण्। कडवर्णे। कवेः पश्चेतिइलच्प्रत्ययः।
पकारश्चांतादेशः। कपिं वर्णं लातीति वा। पुंडरीककरिण्यां तु दिग्वाग्गो विशेषयोः। स्त्रीरेणुकायां कपिला वर्णेना कुक्कुरे मुनौ। अनलेवासुदे
वे च कपिलः परिकीर्तितः। पिंजति। पिजिवर्णे। अचूर्न्यंक्वादिः। पिंगा गोरोचना हिंगुना डिका चंडिका सु च। पिंगीशम्याप्रियंगे नारालके तु नपुं
सकं। पशति। पिशअवयवे। विडादिभ्यः कित् इत्यंगच्। कंद्रति। कद्भिआह्वानेरोदने च। मृगय्यादित्वात्साधुः। कद्रुस्त्रिषु स्वर्णपिंगे नागानां मा

(5)

कडारः कपिलः पिंगपिशंगौ कद्रुपिंगलौ ॥१६॥ ॥

तरि स्त्रियां। पिंजति। पिजिवर्णे। वृषादित्वात्कलच्। न्यंक्वादीनां चेति कुत्वं। पिंगं लातीति वा। पिंगलः कपिले वह्नौ रुद्रे र्के पारिपार्श्वके। कणेमु १०६
निधर्भेदे पिंगला कुमुदः स्त्रियां। षट्कपिलस्य॥ राघार्णवे तु सितपीत हरिद्रक्तः कडारस्तृणवह्निवत्। अयं तु द्रक्तपीतांगः कपिलो गोवि
भूषणः। हरितो ऽधिकसौ तु पिशंगः पद्मधूलिवत्। पिशंगस्तु सितावज्ञान् पिंगो दीपशिखादिषु। पिंगलस्तु परच्छायः पिंगस्तु कांग
सौ खंडवदिति॥ ॥१६॥ ॥ ॥

चीयते॥ चिञ् चयने। अमिचिमीतिक्रः। चितं त्रायते वा। त्रैङ् पालने। कः। चित्रं किर्मीरे इति समासमहत्ता पृथग्रूपभेदप्रदर्शनं गुणे शुक्लादयः पुंसीत्य
स्य वाधनार्थं। चित्रा खुपर्णीगोडुंबासुभद्रादंतिकासु च। मायायां सर्पे नक्षत्र नदीभेदेषु च स्त्रियां। तिलकालेख्ययोः। क्लीबं कर्बुराद्धु तयोरपि। तद्युक्त
योः स्त्वन्यलिंगं। नामानुशासने तु नानार्थे पुंस्कोऽयं पठितः तदनुरोधेन ह्यपि चित्र किर्मीरे इति समस्तं केचित् पठंति। कीर्यते। कॄ विक्षेपे। गंभीरादय
(3A) श्वेति किरतेरीरन् मुडागमः। कर्मीरो नानानागरंगे। कल्मयति। क्विप्। कल्। माषा यस्य भि भवति वर्णान् माषः। मष हिंसायां। हंत्यर्थाश्चेति चुरादौ पा

चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे॥ ॥

ठात् णिच्। कल्स्चासौ माषश्च। कल्माषः कर्बुरे कृष्णे इति मूर्द्धन्यांतेरभसः। कल्माषो राक्षसे कृष्णे शबलेऽपीति हेमः। शपत्याक्रोशतीति वर्णान्। शप आ
क्रोशे। शपेर्वश्चेति कलः वत्वं च। एति वर्णान्। एतेर्वर्णे तन्। अतः कर्बुर आगते। कर्ब हिंसायां। मद्गुरादयश्चेति निपातनात् कुरच्। बवयोरभेदात् कर्बुरः।
कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः। कर्बुरा कृष्णवृंतायां शबले पुनरन्यवत्॥ ॥ षट् नानावर्णस्य॥ ॥ ॥

गुणइति॥ यद्यपिशुक्लंरूपमित्यादौविशेष्यनिघ्नत्वेवेष्यते। तथापिविशेष्यानुपादाने प्राप्तस्यसामान्येनपुंसकमित्यस्यापवादोयं। परस्यशुक्लइत्या
दिबोध्यं। अपवादांतरमाह गुणीति। विशेष्यस्यानुपादानेयद्वयल्लिंगंप्रतिपिपादयिषितंतल्लिंगाइत्यर्थः। यथाशुक्लंशुक्लःशुक्लेत्यादिः॥ १७॥
इतिधीवर्गः॥ ॥ ब्रह्मणइयं॥ ब्राह्मो ऽजाताविति टिलोपे टिड्ढेति ङीप्। ब्राह्मीतुभारती। शाकभेदःपंकगंडीहंजिकासोमवल्ल्यपि।
ब्रह्मशक्तिरितिहैमः। बिभर्त्ति। भृमृदृशीत्यतच्। ततःप्रज्ञाद्यणि ङीप्। भरतस्येयमितिवा। अथभारती। वचनेन्चसरस्वत्यांपक्षिवृत्ति

(5)

गुणेशुक्लादयःपुंसिगुणिलिंगास्तुतद्वति॥ १७॥ इतिधीवर्गः॥ ब्राह्मीतुभारतीभाषागीर्वाग्वाणीसरस्वती॥

प्रभेदयोः। भाष्यते। भाषव्यक्तायांवाचि। गुरोश्चेत्यप्रत्ययः। गृणंत्येतां। ग्रृशब्दे। संपदादित्वात्क्विप्। भागुरिमतेगिरापि। ब्राह्मणीवच
नंवाचाजल्पितंगदितंगिरेतिशब्दार्णवः। उच्यतेवाक्। वचभाषणे। क्विब्वचीत्यादिनाक्विप्दीर्घो ऽसंप्रसारणंच। वर्ण्यते। इञ्। कृदि
काराददिति ङीष्। गौरादित्वाद्वा। सरोस्त्यस्याः मतुप्। सरस्वतीसरिद्भिदि। वाच्यापगायांस्त्रीरत्नेगोवाग्देवतयोरपीतिहैमः। सप्ता
धिशतदेवतायाः॥ ॥ ॥ १०७

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ... Mumbai.

(5A)

व्याहरणं॥ व्याङ् पूर्वाद्धृञ्। भावे घञ्। वच भाषणे। क्तिन्। संप्रसारणं। लप व्यक्तायां वाचि। भावे क्तः। भाष व्यक्तायां वाचि। भाषणं भाषितं। भावे क्तः। वचे भावे ल्युट्। असुन्निक्त्वः। षट् भाषणस्य। केचित्तु ब्राह्म्या वाचस्त्रयोदश पर्याया इत्याहुः॥

व्याहार उक्तिर्लपितं भाषितं वचनं वचः॥ ४॥ अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः॥

॥ १॥ संस्कृतादपभ्रंशयति। भ्रंशु अधःपतने। पचाद्यच्। अपभ्रष्टः शब्दोऽपशब्दः। द्वे। शास्त्रे व्याकरणादौ यो वाचकः साधुः स शब्दः। स एव निरूपपदेन शब्दशब्देन व्यवह्रियते॥ ॥ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

 तिङंतानांचयः॥ पचतिपच्चय। पचतिभवति। पाकोभवतीत्यर्थः। सुवंतानांचयः। प्रकृतिमिद्धमिदंहिमहात्मनामित्यादि। भवतीत्य
ध्याहारस्यभाष्यकृतोमतेआवश्यकताभावात्। सः वाक्यं। क्रियेत्यादि। वाशब्दः समुच्चये। कारकान्वितक्रियावोधकंघटमानयेत्या
दितिङ्सुच्चयात्मकमपिवाक्यमित्यर्थः। केचित्तुभाष्यकारमतेनप्रथमपक्षः। एकतिङ्वाक्यमितिवार्तिकाभिप्रायेणापरइत्या

(6)

तिङ्सुवंतचयोवाक्यंक्रियावाकारकान्विता॥२॥

हुः। यत्तुपूर्वंशाब्दात्मकवाक्यस्यलक्षणंक्रियेत्यादितुआहुः। तत्र। नचोऽशाब्दसंज्ञायामितिकुत्वनिषेधकसूत्रस्याननुगुणं। उच्य १०८
तेइतिवाक्यं। वचेर्यत्। चजोरिति कुत्वंशब्दसंज्ञायां। अन्यत्रतुवाच्यं॥ ॥२॥

"Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(6A)

श्रूयते ॥ श्रु श्रवणे । कर्मणि क्तिन् । श्रूयते धर्मो नयेति वा । श्रूयजिसिभ्यः करणइति क्तिन् । श्रुतिः श्रोत्रे च तत्कर्मण्याम्नायवार्त्तयोः स्त्रियां ॥
विंदत्यनेन धर्मं । विद ज्ञाने । हलश्चेति घञ् । वेदः श्रुतौ च वित्तौ च । आम्नायते अभ्यस्यते । म्ना अभ्यासे । कर्मणि घञ् । आमनन्ति उपदिशन्ति ध
र्मो धर्मा विति वा । इयाद्यधेतिणः । आम्नायः कुलआगमे । उपदेशे चेति हैमः । श्री णिवृक्तस्य । त्रय्या धर्मस्त्रयी धर्मः । तया त्रय्या विधिर्विधीय
मानो यज्ञादिस्तद्धिधिः । विधानमृग्यजुः सामानां त्रयी धर्मं विदुर्बुधाः । एकं । ऋच्यंते स्तूयंते देवा अनया । ऋच स्तुतौ । क्विप् । स्यतिपापं । षो

श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ॥ स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥

अंतकर्मणि । मनिन् । सामक्लीबमुपायस्य भेदे वेदांतरेपि च । इज्यते अनेन । अर्तिहृधपीत्युस् । वेदानां प्रत्येकमेकैकं । इत्यते त्रयो वेदास्त्रयी ॥ त्रयो
वयवा यस्याः सा संहतिः । त्रिशब्दात्संख्याया अवयवे तयप् । द्वित्रिभ्यां तयस्यायच् । टिड्ढेति ङीप् । त्रयी त्रिवेद्यां त्रितये पुरंध्र्यां सुम
तावपीति हैमः । वेदत्रय संघातस्यैकं ॥ ॥ ३ ॥ ॥

२ श्रुतेर्वेदस्य शिक्षेत्याद्यंगं। शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः। छंदो विचितिरित्येतैः षडंगोवेदउच्यते। शिक्षंतेस्थानादिकमनया॥
शिक्ष विद्योपादाने। गुरोश्चेत्यः। अंग्यतेज्ञायतेनेन। अगिगतौ। घोवन्त्वा। एकंवेदांगस्य। अवति। अवतेष्टिलोपश्चेतिमन्। प्रत्ययस्यैवटिलो
पः। ज्वरत्वरेत्यूठ्। गुणः। वषट्कारइतिलिंगात्समुदायादपिकाप्रत्ययः। प्रणूयतेस्तूयते। णु स्तुतौ। ऋदोरप्। उपसर्गादितिणत्वं॥ द्वे॥
(७) इतिहेतिनिपातेपर्यायपदद्वयंव्ययं। तदास्तेअस्मिन्। आसउपवेशने। हलश्चेतिघञ्। पुरावृत्तमाचष्टेपुरावृत्तं। आख्यानरूपंतात्तूपचाद्यच्।

शिक्षेत्यादिश्रुतेरंगमोंकारप्रणवौसमौ॥ इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः॥ ४॥

पूर्वाचरितप्रतिपादकस्यग्रंथस्यद्वे। उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः। चतुर्थः प्रचितोनामकोयत्तोसोच्छांदसः स्मृतः। स्वरंति। शब्दा
ह्वायंते। स्वृशब्दोपतापयोः। पचाद्यच्। यद्वास्वर्यंतेअर्थाएभिः। पुंसीतिघः। यद्वा। स्वनराजंते। राजृदीप्तौ। अन्येभ्योपीतिडः। स्वरा १०९
अचः। तद्धर्मत्वादुदात्तादयोपि॥ स्वरोनासासमीरेस्यान्मध्यमादित्रिकस्वरे। उदात्तादावकारादौरवड़ादौचधनौपुमान्। इतिविश्वमेदि
न्यौ। उत्उच्चैरादीयतेउच्चार्यतेस्म। क्तः। अचउपसर्गात्तः। उदात्तोदात्तमहतोर्हृद्येचस्वरभित्यपीतिहेमचंद्रः॥ एकं॥ ४॥॥

(७A)

अनुश्रवणोत्तरमीक्षणपरीक्षणमन्वीक्षा। साप्रयोजनमस्याः। प्रयोजनमित्यिठञ्। दम्यतेनेन। दमुउपशमे। अमंताड्डः। दंडोनीयतेनेवोध्यते
नयादंडनीतिः क्तिन्। यद्वा। दंडंनयतिदंड्यान्प्रतिप्रापयति। क्तिच्। आन्वीक्षिकीसाहचर्यात्स्त्रीत्वं। एतौद्वौमात्तर्कविद्यायांन्यायरूपा क्र२
यामर्थशास्त्रेचवर्तेते। अर्यतेगम्यते। ऋगतौ। उषिकुषीतिथन्। अर्थस्यभूम्यादेःशास्त्रं। एकैकं। आचष्टे। चक्षिङःख्याञ्। एवुल्। उ

आन्वीक्षिकीदंडनीतिस्तर्कविद्यार्थशास्त्रयोः॥ आख्यायिकोपलब्धार्थापुराणंपंचलक्षणं॥१॥

पलब्धोज्ञातोर्थोयस्याःसा। एकंज्ञानसत्यार्थभूतायाःकथायाः। पुराभवं। सायंचिरमितिट्युट्युलौ। पूर्वकालैकेतिसूत्रेनिपातनात्
तुडभावः। यद्वा। पुरापिनवंपुराणं। पुराणप्रोक्तेष्विति सूत्रेनिपातितं। यद्वा। पुराअतीतानागतावर्थावणति। अणशब्दे। पचाद्यच्। पुराणंपं
चलक्षणे। पणेपुंसित्रिषुअलेत्वे। पंचलक्षणान्यस्य। सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच। भूम्यादेश्चैवसंस्थानंपुराणंपंचलक्षणं।
क्वचिदिहवंशयानुचरितंचैवेतितृतीयपादेपाठांतरं॥ह्वे॥ ॥५॥ ॥

अ॰ टी॰ २ प्रबंधस्यकल्पनारचनास्तोकसत्या।कथवाक्यप्रबंधे। चिंतिपूजिकथीत्यङ्।कथा।कादंबर्यादिः२ हे। प्रवल्हतेआच्छादयति। वल्हवल्ह
परिभाषणहिंसाच्छादनेषु। इत्याद्यादिर्हांतः। क्वुन्शिल्पिसंज्ञयोः। ण्वुल्वा। प्रहेलयतिअभिप्रायंसूचयति। हिलभावकरणे। ण्वुल्
व्यक्तीत्वल्पकमप्यर्थस्वरूपार्थस्यगोपनात्। यत्रबाह्यार्थसंबद्धंकथ्यतेसाप्रहेलिका। यद्वा। प्रवह्लतेरिनिप्रवह्लिस्ततोह्रस्वादिकारादि
त्तिङीष्। उभाभ्यांस्वार्थेकन्। प्रहेलिकाप्रवह्लीचप्रश्नदूती विपादिका स्युत्पवह्लिनी। हेदुर्विज्ञानार्थस्यप्रश्नस्य॥ वेदार्थस्मरणपूर्व

(8)

प्रबंधकल्पनाकथाप्रवल्हिकाप्रहेलिका॥ स्मृतिस्तुधर्मसंहितासमाहृतिस्तुसंग्रहः॥६॥

कंरचितात्स्मृतिः। स्मृतिर्ईर्मन्वाद्यशास्त्रस्मरणयोःस्त्रियां। धर्मोधार्थेरचितासंहिता। संपूर्वाद्दधातेःकर्मणिक्तेदधातेर्हिः। इ ११०
मन्वादीस्मृतेः। समाहरणं। क्तिन्। संग्रहणं। ग्रहवृदृइत्यप्। विस्तरेणोपदिष्टानामर्थानांसूत्रभाष्ययोः। निबंधोयःसमासे
नसंग्रहंतंविदुर्बुधाः। संग्रहोवृहदुद्रंगेमुष्टिसंक्षेपयोरपीतिहेमः॥ ॥६॥ ॥६॥ ॥

समसनं॥ असुक्षेपणे। एयत्। संज्ञापूर्वकत्वाद्वृद्ध्यभावः। यद्वा समं छलत्वंतद्विषयिणी इच्छा समस्या। तत्प्रयोज्यत्वाच्छद्मोपि सा। सं
ज्ञात्क्वचित्सर्वप्रातिपदिकेभ्य इति सुगागमेप्रत्ययादित्यः। यप्। समसनं समासः। घञ्। समासोर्थो यस्याः। पूरणसाकां
क्षा। कवित्राक्तिपरीक्षार्थमपूर्णतयैवपठ्यमाना। यथा रातिसंग्रं न भस्त्त लभिति। तत्रदामोदरकराघातविक्लवीकृतचेतसा। दृष्टं

(8A)

समस्यातु समासार्था किंवदंती जनश्रुतिः॥ ११

चाणूरमल्लेनेत्यादिना सा पूर्यते। असमासार्थेतिपाठेतु अपरिपूरणार्थेत्यर्थः। द्वे॥ कोपिवादः। किंपूर्वाद्वदेः भूद्वबहिना सिवदी
ति झच्। झोंतः। गौरादित्वान्ङीष्। यद्वा। किंवदंतीत्याख्यायमाना। अनुकरणशब्दादाख्यानएयंतादचइः। कृदिकारादिति ङी
ष्। जनेभ्यः श्रूयते। क्तिन्। द्वे लोकप्रवादस्य॥ ११

अ॰टी॰ १ वृत्तिर्लोकवृत्तांतस्तदस्त्यस्यां। वृत्तेश्चेति वार्त्तिकेन णः। यत्तु प्रज्ञाश्रद्धेत्यादिना ण इति मुकुटेनोक्तं। तन्न। तत्र वृत्तिग्रहणस्याप्यपाठेऽप्रामाणिकं इत्युक्तवार्त्तिकेनैव ज्ञापितत्वात्। वार्त्तानुवर्त्तने वार्त्तिः उदन्तस्यापि इङ्गणेषु ख्याप्युदंतयोः। निःसारारोगयोः क्लीबं। प्रवर्त्तते व्याप्नोति। वृत्तेः क्तिच्। प्रवृत्तिर्वृत्तवृत्तांतप्रवाहेषु प्रवर्त्तन इति हैमः। वृंतोऽनुवर्त्तनीयो गवेषणीयोऽन्तः समाप्तिर्यस्य। वृत्तांतस्तु प्रकरणे कार्त्स्न्य

(१) वार्त्ताप्रवृत्तिर्वृत्तांत उदंतः स्यादथाह्वयः॥ ७॥

वार्त्ताप्रकारयोरिति हैमः। उद्गतोऽन्तो यस्य। उदंतः साधुवार्त्तयोः। चत्वारि। आह्वयंत्याह्वाः। आतश्चोपसर्गे इति के प्राप्ते प्रसारणिभ्यो डो वक्तव्य इति डः। तैर्यायते प्राप्यते। या प्रापणे। घञर्थे कः। अन्यत्रापीति डो वा। यद्वा। आह्वानमाह्वः। संपदादिः। न स्यादाह्वयः॥ ७॥ ॥ ॥ १३३

आख्यानं ॥ आङः ख्योपसर्गे इत्यङ् । एवमाख्या । अभिधीयते । कर्मणि ल्युट् । म्नायते । म्ना अभ्यासे । यद्वा । नम्यते अभिधीयते अर्थोनेन । णम प्रह्वत्वे शब्दे च ।
नामन्सीमन्नितिनिपातितः । भागरूपनामभ्यो धेय इति स्वार्थे वा धेयः । षट् । ज्ञानं । ह्वेञः क्तिन् । आकारणं । कृञो एयन्ता युच् । ल्युडि आका
नं । त्रीणि । बहुकर्तृकाह्वानस्य संहूतिः । एकं ॥ ८ ॥ विरुद्धो वादः । विनानार्थे । वसंदेहहरणं हारउच्यते । नानासंदेहहरणाद्व्यवहार इति स्मृत इति

(9A) आख्याह्वे अभिधानेच नामधेयं च नाम च ॥ हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥ ८ ॥ विवादो
व्यवहारः स्यादुपन्यासस्तु वाङ्मुखं ॥ उपोद्घात उदाहारः शपनं शपथः पुमान् ॥ ९ ॥ ॥ ॥

कात्यायनः । व्यवहारस्थितो पणे । व्यवहारे पि इति हैमः । इष्टरूणादिन्यायस्य । उपन्यसनं । असु क्षेपणे । घञ् । वाचो मुखमिव मुखं उपक्रमः । इष्टवचनो
पक्रमस्य । उपसमीपे उद्धननं शापनं । भावे घञ् । उदाहरणं । घञ् । इष्टवक्ष्यमाणोपयोग्यर्थवर्णनस्य । प्रकृतोपपादकस्य दृष्टांतादेरित्यन्ये । शप आक्रो
शे । ल्युट् । शीङ् शापेत्यथः । शपथः । कार आक्रोशेत्रापेन च श्रुतादिभिरिति हैमः ॥ ॥ इ ॥ ॥ ९ ॥ ॥

प्रच्छनं॥ यजयाचेतिनङ्। प्रश्नेचेति लिंगात्नसंप्रसारणं। अनुयोजनं। युजेर्घञ्। प्रच्छनं। गुरोश्चहलइत्यङ्। संप्रसारणं। त्रीणिप्रश्नस्य। प्रतिवच
नं। ण्यत्। उत्तरणं। ऋदोरप्। द्वेउत्तरस्य। मिथ्याचासावभियोगश्च। चक्षिङोऽभिआङ्पूर्वाद्भावेल्युट्॥ द्वेशतंमेधारयसीत्यादिमिथ्याविवाद

(10) प्रश्नोनुयोगः पृच्छाचप्रतिवाक्योत्तरेसमे। मिथ्याभियोगोऽभ्याख्यानमथमिथ्याभिशं
सनं॥ १०॥ अभिशापःप्रणादस्तुशब्दःस्यादनुरागजः॥ ॥

स्य। अभिशंसेर्भावेल्युट्॥ १०॥ अभिशपनं॥ घञ्। द्वेमिथ्यारोपस्यसुरापानादिविषयस्य। प्रणदनं। घञ्। प्रणादस्तुपुमांस्तारशब्देचश्र ११२
वणामये। अनुरागकृतशब्देप्रणादःसीत्कृतंनृणमितिशब्दार्णवः। एकंप्रीतिविशेषजनितस्यमुखेकंठादिशब्दस्य॥ ॥ ॥

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

अश्नुतेव्याप्नोति॥अश्रूव्याप्तौ।अशेर्देवनेयुडुक्चत्यसुन।कीर्त्यते।कृतसंशब्दने।ऊतियूतीतिनिपातितः।कीर्तिः प्रसादयशसोर्विस्तारेकर्दमेपिच।
सर्वैःसर्वैर्ज्ञायते।ज्ञावबोधने।घञर्थेकः।समाज्ञेतिसमाङ्पूर्वाज्ज्ञआतश्चोपसर्गेइत्यङ्।समज्येतिपाठेतु।अजगतौ।संज्ञायांसमजे
तिक्यप्।क्यपिप्रतिषेधइतिनवीत्वं।त्रीणि।स्तूयतेनेन।ऋदोरप्।दाम्नीतिष्ट्रन्स्तोत्रं।क्तिन्स्तुतिः।एस्तुतौ।नुतिःचत्वारि॥१२॥ ॥

यशः कीर्तिः समाज्ञाचस्तवः स्तोत्रंस्तुतिर्नुतिः॥११॥आम्रेडितंद्विस्त्रिरुक्तमुच्चैर्घुष्टंतुघोषणा॥

आम्रेड्यते आधिक्येनोच्यतेस्म।म्रेड्ड उन्मादे।क्तः।यथासर्पःसर्पइति।एकं।उच्चैर्घुष्यतेस्म।घुषिर् शब्दे।क्तः।घुषिरविशब्दनइतिएनिषेधः।
विशब्दनंस्वाभिप्रायप्रकाशनं।तच्चप्रकृतेनाभिप्रेतं।ण्यासश्रन्थोयुच्।उच्चैःशब्दनस्यद्वे।आदिनाकामकोधारयेद्ग्रहः॥ ॥ ॥

कक्वचने॥ककलौल्योपत्तापयोः।बाहुलकादुण्।एकं॥९२॥ ॥यथाअवर्णादयोनिंदायांतथावपक्रोशादयोपीत्यर्थः।वर्ण्यते।वर्णवर्णने।घञ्।
वर्णःप्रशंसा।तद्विरुद्धोऽवर्णः।वर्णोद्विजादिशुक्लादियशोगुणकथासुच।स्तुतौनानस्त्रियांभेदरूपाक्षरविशेषणे।क्षिपप्रेरणेघञ्।आक्षेपो
भर्त्सनाहृष्टिकार्यालंकृतिषुस्मृतः।निरादिपूर्वाद्वदेर्घञ्।निर्वादस्याल्लोकवादपरिनिष्ठितवादयोः।उपसर्गस्यघञीतिदीर्घः।परिवादो

(11) काकुःस्त्रियंविकारोयःशोकभीत्यादिभिर्ध्वनेः॥९२॥ अवर्णाक्षेपनिर्वादपरिवादापवादवत्॥उपक्रोशो
जुगुप्साचकुत्सानिंदाचगर्हणे॥९३॥ ॥ ११३

ऽपवादस्याद्दोणावादनचस्कृतेः।अपवादस्तुनिंदायामाज्ञाविश्रंभयोरपि।क्रुशआह्वाने।घञ्।गुपगोपनकुत्सनयोः।गुपेर्निंदायांसन्।
अप्रत्ययात्।कुत्सअवक्षेपणे।णिदिकुत्सायां।गुरोश्चेत्यङ्।निंदास्याद्पवादपिकुत्सायामपियोषिति।गर्हगल्हकुत्सायां।ल्युट्॥द
शनिंदायाः॥९३॥ ॥

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com